Digitized by eGangotri and Sarayu Trust.

No. 89

HARI HARASTOTRA

OF

VASUDEVA

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

Publisher : The Director of Archives, Research & Publication Department, Government of Jammu and Kashmir, Srinagar.

Printed at : Kohinoor Printing Press, Lal Kuan, Delhi.

Price Rs, 2/-

Year : 1962

First Edition : 1000 copies

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

हरिहरस्तोत्रम्

स्वात्मदेवस्तोत्रब्राह्मीविद्याटिप्पणाभ्यां
संवलितम्

काश्मीरिक पण्डित वासुदेवेन विरचितम्

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रकाशक : रिसर्च एण्ड पब्लिकेशन डिपार्टमेंट
जम्मू एण्ड काश्मीर गवर्नमेंट
श्रीनगर

मुद्रक : कोहनूर प्रिंटिंग प्रेस, लाल कुआं,
दिल्ली

मूल्यम् : २ रु०

वर्ष : १९६२

प्रथमावृत्ति : १०००

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

INTRODUCTION

It is gratifying to note that the researches into the vestiges of our historic past have received a flip, under the agies of the present Government. Accordingly the Research and Publication Department has been re-organised and its set up brought on scientific lines. This Department has chalked out a programme of bringing out rare and unpublished manuscripts housed in this Department. The present volume is one of them and it is envisaged to bring out at least one publication every month.

The three works compiled here for publication are :—

(i) Hari Harastotra
(ii) Swatma Devastotra
(iii) Brahami Vidya (Notes on the same)

These have been written by late Pt. Vasudeva, who lived in the reign of Maharaja Ranbir Singh (1856-1887). The author Pt. Vasudeva was the adopted son of Late Pt. Ishwara Kak, great grandson of Late Pt. Lasa Kak. And now a little description of the writings is given separately.

(*i*) *Hari Harastotra*

Comprising of seventy eight verses, Hari Harastrotra is a devotional song written by the author in appreciating and in praise of Hari (Vishno) and Hara (Shiva). This writing is characterised by strength and poetical genius of the author. It also reveals author's capacity to weild the pen as an artist.

(*ii*) *Swatma Devastotra*

This is a devotional poem or an interpretation of the 'Self' in terms of Lord, the 'Supreme'. It comprises of 54 verses of mandakranta metre. The knowledge of soul as the centre of

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

'Supreme soul or Being' has been narrated in a very striking and captivating style. The language used is attractive, purposeful and full of thought.

(*iii*)*Notes on Brahami Vidya*:

Brahami Vidya means knowledge of 'Supreme Lord' as all pervading force. In fact, it is from the same fact that the work (Brahami Vidya) derives inspiration. The present author (Pt. Vasudeva) has provided a convincing and scholarly notes of the Brahami Vidya. The Brahami Vidya is commonly whispered into the ears of a man who is about to pass away. He is being informed that he is Brahman after all. It is also recited on other occasions, by the devotees. It is worthwhile to note here that there is another Brahami Vidya prevalent in Kashmir, that has been extracted from Tantraloka. But it differs from the present one.

It may also be mentioned here that from the perusal of his writings, it becomes evident that Swatma Devastotra was written in 1810 Shaka corresponding to 1890 A.D. It is however Chitrapradepa, written by him in 1788 Shaka, corresponding to 1868 A.D., that has brought him all the celeberity and respect. Chitrapradepa is a Shiva-Cum-Vedantic style of work. The authour has written its exhaustive interpretations too. There is yet another manuscript by the author namely the "Tarachandra Prakash". This is a personal description of a social reformer of the authors time, containing accounts of social activities of Tarachandra Mattu.

Dina Nath Yach

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

श्री हरिहरस्तोत्रम्

काश्मीरिक

श्री पण्डित वासुदेव विरचितम्

ओं नमो हरिहराभ्यां जगत्सर्गादिहेतुभ्यामेकात्मकाभ्याम् ॥

कश्चिच्छ्रीमान् रोगहीनोऽस्ति लोके, रोगैर्ग्रस्तो निर्धनश्चास्ति कश्चित् ॥
एतद्धर्माधर्मयोर्वीक्ष्य भावं, नाधर्माद्भीर्जायते वो भ्रमः कः ॥१॥
धर्माधर्मौ वेधसोक्तौ क्रमाद्द्वौ, मार्गौ वेदे स्वर्गतेर्दुर्गतेर्यौ ।
श्रेयो येन स्यात्तयोर्वो द्विलोके, लोकास्तस्य श्रूयतां निर्णयोऽत्र ॥२॥

श्री विष्णुशम्भुगणपार्यमचण्डिकानाम्,
अर्चासु विश्वभवपोषशमक्षमाणाम् ।
प्रातः करोत्यमलभावयुतोऽर्चनां यो,
यायाच्छनैर्निखिल लोक सुखास्पदं सः ॥३॥

दत्त्वा बलिं सुरखगर्षि गणस्य मन्त्र—
पूतां गृहागतयुतोऽत्ति गृही सदन्नम् ।
नित्यं सपापजलधिमतितीर्य भोगान्,
भुक्त्वा चिरं त्रिदिवमञ्चति देवपूज्यः ॥४॥

येनेह सत्कर्मकृतं सुखावहं,
पापावहं तेन सुखेन लभ्यते ।
सद्दारसत्पुत्रसदर्थसत्क्रिया—
भुक्त्वा चिरं सत्पदवीं स गच्छति ॥५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वाचा वित्तैर्वा क्रियाभिर्विधत्ते,
योऽप्यन्येषां शिक्षया वोपकारम् ।
भृत्यान् वाहान् पुत्रपौत्रान् च दत्ते,
तस्मै राज्ञोऽनुग्रहं चेश्वरोक्तान् ॥६॥

स्नानैर्दानैमूर्तिपूजाविधानै,
र्यागैर्होमैः प्राणयोगैर्यमाद्यैः ।
तुत्क्रान्तानामन्नदानैश्चमानै—
र्मर्त्यः स्वर्गे मोदते भूरिकाले ॥७॥

सन्निष्ठानां यो विधत्ते सपर्यां,
वासोभक्तस्थानसेवादिधर्मैः ।
तृप्त्वा विश्वं सेश्वरं सोऽतिविश्वं,
याति स्थानं यत्र शीतं न चोष्णम् ॥८॥

हर्यंघ्रिकञ्जरसचर्वणलब्धचित्त—
रोलम्बगीतहरिपूतकथाश्रुतानाम् ।
तेनातिशुद्धमनसां परतत्त्वबोध—
लब्धात्मनां वचनतो भवभोगमोक्षः ॥९॥

लोकाः सुखस्थानमुदीरितं बुधै—
र्लोकत्रयं शक्रगिरीशचक्रिणाम् ।
विद्यातपोभक्तिरिमास्तदाप्तये,
तत्राद्यमुक्तं शृणुतान्तिमद्वयम् ॥१०॥

विश्वस्य जन्मस्थितिभंगहेतवे,
मायागुणैर्निर्मितचित्रमूर्तये ।
सर्वेन्द्रियप्राणमनोमतीशिने,
रामाय भक्ताशयभासिने नमः ॥११॥

तथानुकम्पां कुरु कृष्ण देव,
यथासुखं कालमहं नयामि ।
जीवद्दशायामशनादिचिन्ता,
माभूद्धृदि मेऽस्तु तवांघ्रिपद्मः ॥१२॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शम्भो ! त्वदङ्घ्र्यम्बुजरेणुनाशयं,
मार्ष्टुं विमृग्येन सुरैः प्रसीद मे ।
मूर्ध्नि धृतं यत्सुरदैन्यकोविदैः,
सा सा विभूतिः समवापि तैरिह ॥१३॥

श्रीकृष्ण ! विष्णो ! चरणाम्बुजामृतं,
पातुं तवाघौघहरं प्रसीद मे ।
त्वद्भृद्गमाद्भरदेहयोगज—
क्लेशाग्निशान्तीद्धमहत्पदं लभे ॥१४॥

गौरीश ! पीयूषमय त्वदाकृते—
श्चिन्तां विधातुं मनसः प्रसीद मे ।
तन्मे त्वयैकध्यमुपेत्य दुर्भर—
क्लेशाःक्षयं यान्ति तवास्ति का क्षतिः ॥१५॥

स्थैर्यं मनो मे भजते न ते पदा—
म्भोजे हरे ! प्राक्तनपापकर्मतः ।
तेषां कुभाग्यान्मम न क्षयो भवेत्,
नाम्नां मुहुः कीर्तनतस्तव प्रभो ! ॥१६॥

तन्मां विभो ! शिक्षय कीर्तनं कथं,
कर्तास्मि ते येन मतिर्ममामला ।
तीर्त्वा तया दुस्तरमोहसागरं,
तिष्ठामि चानन्दपदे गताशयः ॥१७॥

मां प्रतीश्वर ! कृपार्द्रया दृशा,
तापतप्तहृदयं कदेक्षताम् ।
तर्हि जीवनमहं पुनर्लभे,
जन्ममृत्युभयदोषवर्जितम् ॥१८॥

त्वत्कृपामिहिरतेजसा यदा,
गाढमोहतिमिराश्रये हरे ।
मद्धृदम्बर उदेत्य नाशिता,*
ज्ञान रात्रिरखिला दिशः शुभः ॥१९॥

---

*उदेतिनाशिताखिलज्ञानरत्रि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विश्वेश मे त्वद्भजनं कथं भवेत्,
कालो व्ययं यात्यशना दिचिन्तनैः ।
अयं मदर्चां कुरुतामितीशना,
चेत्ते जहीशाशनतादिचिन्तनम् ॥२०॥

विष्णो ! निजार्चां यदि मां हि कारये—
श्चित्तं तदा मे कुरु दोषवर्जितम् ।
रम्यां स्थितिं तत्र विधेहि शोधिते,
तेनैव जन्म सफलं भवेन्मम ॥२१॥

हृद्व्योम्नि मे नाम रविः शिवेति ते,
यदोदयं शर्ममयः करोत्यसौ ।
स्थातुं तदा तत्र तमो न शक्नुयात्,
विश्रान्तिमाप्नोमि महेश ! संसृतौ ॥२२॥

केचिद्धरे ? मुक्तिमिताः पुराधमा—
त्वन्नाममात्रेण तथा प्रसीद मे ।
मत्तः पुनर्जन्म दुरिद्भवार्णवे, +
नैराश्यमायाति तवास्ति का क्षतिः ॥२३॥

कृत्वा मनो दोषविहीनमीश्वरा—
नुकम्पया प्रापय मां निजं पदम् ।
करोमि पूजां तव शोभनां वपु—
र्घ्राणेन्द्रियार्थाशयवाक्समर्पणैः ॥२४॥

यथा त्वया दैत्य कुलाद्विमोचितः,
प्रह्लादभक्तो नरसिंहरूपिणा ।
तथा हरे ! मोचय मां भवापदः,
कीर्तिस्तदारोहति ते पुनर्दिवम् ॥२५॥

सर्वेक्षितुस्ते न पतेत्त्रिलोचना—
तुरे मयीक्षा नहि जायते यतः ।
तवानुकम्पा मम दुःखदर्शनात्,
कस्यापि चित्तं नहि बाधते व्यथा ॥२६॥

+ चिन्त्यमेतत्

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कृष्ण ! देव ! शरणं व्रजामि ते,
पादपंकजरजः कणानहम् ।
तेन मे मनस आर्ततां जहि,
नाथ पालय च मां यमाध्वनि ॥२७॥

कृपेक्षणं तर्हि विधत्स्व शंकर !
किञ्चिन्न दुःखं मयि वर्तते यथा ।
मुखे क्षणेनाधिकृतिस्तवास्ति चेत् ,
पादाम्बुजं दर्शय मेघकृन्तनम् ॥२८॥

मह्यं रमां देहि रमेश सात्विकीं,
यया सुशर्मेह परत्र चाप्नुयाम् ।
तदा त्वदंघ्र्यम्बुजरक्तमानसो,
भूत्वा तरिष्ये भवदुःखसागरम् ॥२९॥

उन्मृज्य गौरीश घनं रजो वसन् ,
मद्धृद्गिरौ खर्षिसभां स्वसन्मुखाम् ।
कृत्वा रहस्यं परमात्मगोचरं,
तत्त्वोपदेशं कुरु येन ते प्रियाः ॥३०॥

लोकेश ! त्वत्पादकृतालयं सदा,
पश्येन्न मां कापि यमोऽखिलार्दनः ।
भवस्य पारं हि गतोऽस्म्यहं हरे !
कथं स लोके विचर *क्रणद्धि माम् ॥३१॥

कदा हृदब्जे नयनत्रयं स्फुरेत् ,
शम्भो ! तवानादिज पाप सञ्चयम् ।
दह्याद्धृदब्जं विकसेत्क्रमान्मनो—
भृंगोः पदाब्जे लयमेति कोचितेx ॥३२॥

आशा त्वदंघ्र्यम्बुजयोर्भवार्णवे,
मग्नस्य मे केशवतारिणी ततः ।
तत्र क्षणं कल्पसमं भवेन्मयि,
कदानुकम्पा फलदायिनी तयोः ॥३३॥

---

*चिन्त्यमेतत्

xचिन्त्य मेतत् पद्यम्

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

१
तदा त्वमीशान ! हृषीकसञ्ज्ञया—
विशुद्धसत्त्वाश्रयवृत्तिगोचरा: ।
कुर्वन्ति कर्माणि प्रसन्नतां गतो,
यैस्तेषु साक्षात्प्रविशे: स्वयं शिव: ॥३४॥

विश्वं सर्वं सच्चिदानन्दरूपं,
व्यक्तीभूतं सच्चिदानन्दरूपात् ।
मोहध्वान्तात्तत्तथा मे ऽनुभाति,
दिव्यं चक्षुर्दत्स्व मे कृष्ण ! देव ॥३५॥

कालो वृथा याति तवार्चनंविना,
शक्रादिसंचिन्त्यपदाब्जयोर्मम ।
वित्तार्जनाशाशनगेहकर्मणि,
तुष्ट्वात्मगं मे कुरु चित्तमीश्वर ! ॥३६॥

तद्दाने चेन्मे विलम्बं विधत्से,
मृत्युर्नीत्वा दुर्गतौ मां क्षिपेद्द्राक् ।
नानायोनेर्न कदाचिद्विमुच्ये,
यानायानात्तेन ते कृष्ण ! कोऽर्थः ? ॥३७॥

शक्त्या स्वयापास्या (?) खिलं जगद्विभो !,
तत्रावनं मे किल भावि गौणतः ।
मुख्यं स्वतत्वस्मृतिबोधदानतः,
पुनर्भवाम्बोधिनिमग्नमोचनम् ॥३८॥

मायाधृताह्लादकमूर्तिषु त्वया,
कृतानि कर्माण्यमलानि माधव ।
शृण्वन्ति गायन्ति गृणन्ति तानि ये,
तेषां न दृश्यो भवसागरो महान् ॥३९॥

शक्त्या शिलाचित्रवदंञ्जितं त्वया,
विश्वं धृतं संहृतमात्मनीच्छया ।
शक्तीशः निर्मातुमिदं प्रभुर्भवान्,
मच्चित्तमोहापसरे न किं क्षमः ॥४०॥

---

१ ममे

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

येषां न वाण्यां तव कीर्तिगायनं,
कर्णौ हरे संश्रृणुतो न ते कथाम्।
मूर्तेः स्मृतौ ते मनसा न रज्यते,
मानुष्यरत्नं पतितं हि तत्करात् ॥४१॥

गंगा[1] कपर्दे शिरसीन्दुरिन्धते,
यस्योरसीभाधिपचर्मचाम्बरम्।
माला[2] फणी यस्य गले विराजते,
तादृक्स भायाद्धृदि मे सदा हरः ॥४२॥

शंखादयो भान्ति चतुर्भुजस्थिताः,
श्यामा तनुर्यस्य गले च कौस्तुभः।
माला पदाब्जे तुलसी रमोरसि,
कृष्णः स तादृग्घृदये रमेत मे ॥४३॥

भूतेश ! सर्वाशययन्त्रचोदक
श्चित्तस्य मे चालनमस्ति ते दृशा।
तां चेद्विदध्या मयि रूषिते मलै
गुप्तं न किञ्चिद्भवतीह वस्तु मे ॥४४॥

त्वत्तत्व चर्चापरताशयस्य मे,
प्राक्सत्क्रियालब्धभवत्कृपावशात्।
बाधेत तर्ह्यच्युतदुःखसञ्चयो,
न मां भवत्पूजनमग्नमानसम् ॥४५॥

गंगाधरात्युग्रभवाग्नितापितो,
हृत्पंकजो याति न कस्य दुर्गतिम।
यत्र स्वतत्वं प्रथयानुकम्पया,
निर्वाणमेत्याशु तदा हि तत्र सः ॥४६॥

---

१ गंगा जटायामुडुपोऽस्ति मस्तके - इत्यपि पाठः मूल पुस्तक एवोपलम्यते।
२ भूषा—इत्यपि पाठः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

((रामाभिरीश ! रमतामरार्चित :।
कृत्वोरुधात्मानमपारदृग्परा)।
रासोत्सवे सर्वमनोहरस्तथा।
कदा प्रथां कृष्ण इयात्स मां हृदि)) ।।४७।।

*रेमे रमाभी रमणो रमेश्वरो,
भूत्वोरुधा यो रमणीयमूर्तिभि :।
रासोत्सवे सर्वमनोहरो विभु—
स्तथा प्रथां कृष्ण इयान्ममात्मनि ।।४७।।)

प्राग् जन्म दुष्कर्मवशाद्दुरत्यये,
त्रितापसन्तप्तहृदस्मि वर्त्मनि।
त्राता न कश्चित्त्वदृते ऽत्र शंकर !,
तत्ते पतेद्दृग् हृदि मे ऽमृतस्रवा ।। ४८।।

आर्तो ऽस्म्यहं प्राक् सितकर्मपाशतो,
नानार्थ चिन्ताभ्रमणात्कदा स्थितिम्।
यायाद्धृषीकेश ! तवांध्रिसंस्मृति—
श्चित्ते यया मे भवपाशमोचनम् ।। ४९ ।।

त्वदङ्घ्रिकञ्जामृतनीरशाशयः
पुरा हरा सम्भवभोगचिन्तकः।
दाहं लभे तस्य फलं प्रियाप्रिय—
वियोगसंयोगजशोकशुष्मणः ।।५०।।

दारात्मजार्थाप्तगृहाश्वगोगजाः,
प्राक् कर्मजाः किं सुखयन्ति पुरुषम् ?,
चयाप्ययाभ्यां बहु दुःखदा हरे !
प्रवृत्तिमार्गान्नय मां ततः परम् ।।५१।।

ममाद्यपर्यन्तमहो गतोऽखिलः,
कालस्त्वदर्चाविमुखोऽर्थवांछिनः।
तस्मादिदं नेह परत्र चोचितं,
जन्मेश मे ते ऽनुकृपा ततः परम् ।।५२।।

रमतेऽमरार्चितः इति प्रतीयते

*संभाव्यते लेखकेन शोधितोऽयंश्लोकः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नारायणामी भवदुःख राशयो,
ऽबाधन्त मां मा परयानुकम्पया ।
तवापि हानिर्न भवेद्धि जीवनं,
पराद्वयाह्लादरसानुपायि मे ॥५३॥

सर्वेषु भावेषु मतिस्त्वदात्मतां,
कदा प्रयातु मम मोहितात्मनः
तदा न बाधन्त उमेश दुस्सहा
रागादयो मे परतत्वगं मनः ॥५४॥

चित्तं भवाब्धौ लुठितं भयातुरं,
जन्मात्ययोर्म्यावलि चालितान्तरम् ।
कदोद्धरेन्मे कृपयात्ममत्स्यक ?
स्तस्मात्स्वभक्ताशय दुःख हारकः ॥५५॥

विमर्शमंथेन विलोड्य विस्तर—
विश्वार्णवं यत्कृपया परामृतम् ।
उद्धृत्य पीत्वामरतामगुर्जना—
स आत्मकूर्मो ऽवतु मां भवार्णवात् ॥५६॥

मोहेन मे मज्जितमात्मनो वपु—
र्देहादिवार्धौ बहुदुःखभंगिनि ।
विवेकशास्त्रेण निहत्य तं रिपुं,
तदात्मयज्ञस्तत उद्धरेत्कदा ? ॥५७॥

यो जागरस्वप्नसुषुप्तिकानने,
ष्वन्तर्बहिः क्रीडति खैणदूरगः ।
कालाहिभीताशयमोहकुञ्जरान्,
भिन्दन् नृसिंहोऽवतु मामघारितः ॥५८॥

चिच्चेत्यबन्धं निखिलान्निवर्त्य तं,
निजात्मतत्त्वेन नियोज्य तेजसा ।
स्वाराज्यधिष्ण्ये विमले निधाय च
दृश्यो भवेन्मे ऽपि कदात्मवामनः ॥५९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मनस्तरो र्भीमसहस्त्रशाखिनो,
निकृत्य शाखा ममत्वासनात्मिकाः ।
सद्वाक्यतात्पर्यकुठारधारया,
कदा भवेन्मूलभिदात्मभार्गवः ? ॥६०॥

भवाब्धिमुल्लंघ्य हृषीकमानसैः,
साकं नवद्वारपुरान्तरस्थितम् ।
हत्वात्मशत्रुं निजशक्तिमीप्सितां,
लब्ध्वात्मरामः स्वपुरं कदा व्रजेत् ? ॥६१॥

कदार्थ भेदोद्भवदुःखकारण—
स्वाज्ञानदैत्येन्द्रविदारणं जगत् ?,
प्रबोधचक्रेण विधाय दर्शयेत्,
ममात्मकृष्णो निखिलं निजात्मनि ॥६२॥

यो योगनिद्रावशतो ऽस्ति गूढदृक्,
धर्मादयः सुप्तसमा भवन्ति तत् ।
कलौ च्युतास्तर्हि जनाः स्वधर्मतो,
मां पातु मोहात्स तदात्ममारजित् ॥६३॥

दृश्यावसानाववसरे खदानवान्,
कामादिसंगै दुरितीकृतान्तरान् ।
यो वस्तु तर्कादिशरै र्हनिष्यति,
मामात्मकल्किदुरितात्स मुञ्चतु ॥६४॥

ये एते ऽवतारा दशमायया धृता—
श्चिदात्मना विश्वतमोपशान्तये ।
नामोक्तमात्राधमपावनाश्च मे,
कुर्वन्तु याञ्चां कृपयार्थिनो ऽव्ययाम् ॥६५॥

वेदोक्तवर्णाश्रमकर्मनिर्मितैः,
पित्रादिलोकाधिगतिर्द्विजन्मनाम् ।
तद्व्यत्ययकर्मसमृद्धदुर्गतिः,
फलं भवेद्रोगदरिद्रतादिकम् ॥६६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लोके द्विधा कर्म हि साशयं निरा—
शयं च भोगाप्तिरिहाद्यतो भवेत् ।
द्वितीयतो ऽन्तः करणस्य शोधनं,
तस्मिन्विरक्त्यादि तथात्मवेदनम् ॥६७॥

ज्ञानं सवेद्यं त्वपवेद्यमात्मनो—
द्विधा हि विश्वात्म हरिं भजेत यः ।
रुद्ध्वा ततो ऽव्यक्त ऋते मनो ऽखिला—
त्कूटस्थ आत्मन्यगुणे लयं नयेत् ॥६८॥

जायेत मे चिन्मयदृक् ततो ऽखिले,
बाह्यं न किञ्चिन्न च किञ्चिदान्तरम् ।
विश्रान्तिमाप्नोमि परावरोत्तरे,
चित्खे यथा वारिणि वारिसन्मये ॥६९॥

कामानलदाहविप्लुष्टचेतसे,
विनष्टसर्वार्थयथार्थसंविदे ।
संजातलोभाद्यरये दिशस्व मे,
चर्चाग्निमस्योषितये ऽपि कामहन् ॥७०॥

क्रोधाहिसन्दष्टविवेकचक्षुषे,
हिताहिताज्ञानजहन्तृधर्मिणे ।
प्रदेहि मे विस्मृतनारकव्यथा—
स्मृतिं क्षमामन्त्रमुपैमि कंसहन् ॥७१॥

गृहे गृहे लोभपिशाचचालितो,
वित्तानलनुन्नमनस्तृणोऽस्म्यहम् ।
सन्तोषमंत्रेण विमुह्य तं कदा ?
विश्राममाप्स्यामि निजास्पदे चिरम् ॥७२॥

चिच्चेत्यबन्धोऽखिलदेहसंगत—
दुःखादिहेतुर्नरकाग्निचोदकः ।
कदा विवेकास्त्रमुपेत्य त्वत्कृपा—
दत्तं विरूपाक्ष ! निहन्मि तं रिपुम् ॥७३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चिच्चेत्यभेदोऽखिलदृश्यदर्शको,
नानार्थभेदाद्द्वयदुःखदायकः ।
तदैक्यबोधेन निहत्य तं कदा ?
मोहं स्वतत्त्वं समुपैमि केशव ।।७४।।

यः शक्तिचक्रेश्वरभावमीश्वर !
त्वच्छक्तिपातादधिगम्य वल्गति ।
नो शक्तिभिस्तस्य भिदा यथा तव,
चिदात्मनो मे ऽपि तथा दिदेश ताम् ।।७५।।

हे कृष्ण ! शम्भो ! युवयोरनुग्रहात् ,
मोहोग्रजालान्तरमुक्तचेतसः ।
ममापि विश्वं यदि भाति चिन्मयं,
तत्पूजनं वां परमं मुदा भवेत् ।।७६।।

हे कृष्ण ! शम्भो ! मधुपेश ! माधव !
शिवाच्युतोमेश ! हरे ! हराक्षर ।
नामानि वाग्वक्तुमसेश्वरौ हि वां,
सद्वस्तुचिन्तासु लयेऽस्ति दुर्लभा ।।७७।।

धातर्जराजीर्णितदेहकंचुकं,
व्याध्याधितापत्रयमर्दितं च माम् ।
प्रसीद यर्ह्यच्युतसंगतं मनो,
निर्यान्तु देहादसवस्तदा त्विमे ।।७८।।

विश्वाधिपौ हरिहरौ कृपया तु देहौ,
ध्यात्वा तयोर्विरचितं स्तुतिमात्रमेतत् ।
श्री वासुदेव विदुषा परलोकदुःख—
संशान्तये बुधबिलोकनयोग्यगुम्फम् ।।७९।।

इति श्रीपण्डितवासुदेवविरचितंहरिहरस्तोत्रं समाप्तम्

——:०:——

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्वात्मदेवस्तोत्रम्

सच्चिच्छर्मरसैकमूर्तिरमलो नानोरुदुःखाकुलं
दृष्ट्वा विश्वमधोऽवतारितवपुर्व्यासात्मनास्तीश्वरः ।
निस्तारार्थममुष्य येन कृपया स्युर्ब्रह्मसूत्रप्लवा
मोहाब्धेर्प्रथिताः पराशरसुतं नौमीश्वरं तं सताम् ॥१॥

पूर्णं शुद्धं विबुद्धं स्वरसममृतमजं चित्तनुं शान्तमाद्यं
सत्यं सूक्ष्मं स्वतन्त्रं परविभुममृतं शान्तशोकं महेशम् ।
नित्यंमुक्तं महान्तं पुरुषमुरुपदं शन्तमं शान्तमायं
कूटस्थं मायिनं साक्षिणमतनुमहं स्वात्मदेवं नतोऽस्मि ॥२॥

यच्चित्खाद्विष्णुरुत्थः क्षयजलधिजले शेषशय्यां शयानो
विश्वात्मा यस्य नाभेरजनि नियतितो लोकपद्मं ततोऽजः ।
येनात्रेदं विसृष्टं श्रुतिमुनिमनुजामर्त्यदिक्पालगर्भं
तं मायोपात्तमूर्त्या खिलजनफलदं स्वात्मदेवं नतोऽस्मि ॥३॥

नानेदं यद्विवर्तसदिव निरुदके नीरवद्भाति येषां
भ्रान्तास्ते भूरिदुःखालयतनुगमनात् क्वापि नैवेह तुष्टाः ।
दैवादाप्ताप्तवाक्यामृतमृदितमलाः केचिदैक्याद्यमापु-
स्तं मोहध्वान्तनाशोदितमुदितपदं स्वात्मदेवं नतोऽस्मि ॥४॥

यन्मायादूषितान्तः करणमिदमचिज्जीववृन्दं न वेत्ति
केनास्या भूरिदुःखालयसरणेः पारमेम्याश्विहेति ।
तन्नानायोनियन्त्रोत्कटकदनततिं दुर्विषह्यां प्रभुङ्क्ते
मायेशं विमायं स्फुरदुरुविभवं स्वात्मदेवं नतोऽस्मि ॥५॥

विष्णवीशोद्गीथवाग्भिर्विकृतनिजवपुर्ह्युपास्त्यै जनानां
योऽध्यारोपे नमस्यश्चिरमलहतये तापतप्ताशयानाम् ।
दृष्टस्त्यक्तापवादे द्वयममलधिया शिष्ट ईड्योऽखिलाद्य-
स्तं शान्ताशेषविश्वं चितिसुखवपुषं स्वात्मदेवं नतोऽस्मि ॥६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दृष्टादृष्टोग्रदुःखेक्षणजनितभयप्रोज्झिताकार्यवृन्दै
र्मोघ्यद्भीष्ममृत्युरगमुखलुठिताशेषभावोत्थदृग्भिः ।
श्रोतव्यं यस्य तत्त्वं श्रुतिशिखरगिरा सद्गुरोर्दृष्टतत्वात्
तं देहप्राणचित्तोपहितनिजपदं स्वात्मदेवं नतोऽस्मि ॥७॥

संव्यक्ताशेषकामाद्यरिगणविदलद्वस्तुतर्कादिमित्रैः
संयातानर्थनाशोद्यतशमदमकैः श्रौतवाक्यार्थजुष्ट्या ।
कृत्वा सद्देहखादेः पृथगमलधिया यस्य तत्वं विचिन्त्यं
तथ्यातथ्यतर्कस्फुटितचितिपदं स्वात्मदेवं नतोऽस्मि ॥८॥

रुद्धप्राणेन्द्रियान्तः करणतनुगिरो दम्भमानादिहीनाः
संशान्ताशेषदोषा दृढयतनजुषोऽनात्मवर्गाद्विवेच्य ।
तैर्ध्येयं यस्य तत्वं मननपरिचितासंविदैक्यानुवृत्या
तं भावाभावविश्वस्फुरदुरुमुकुरं स्वात्मदेवं नतोऽस्मि ॥६॥

नानाजन्मानुभूतामलसुकृतवशाद्दाप्तनिर्वेदसंख्याः
शान्तानात्मात्मवादोदितनिजपददृग्दष्टविश्वात्मतत्वाः ।
तैरीक्ष्यं यस्य तत्त्वं द्वयमलरहितं शोधितेनात्मनास्मि—
स्तं दृष्टादृष्टदृष्टिद्वयभरिततनुं स्वात्मदेवं नतोऽस्मि ॥१०॥

विश्वं यद्भांशुयातात् सलिलमिव मरौ भात्यजायां विचित्रं,
नो वेद्यं यस्य तत्त्वं दिव इव करणैः प्राणदेहाद्ययोगात् ।
वाक् चक्रं भेदभिन्नं यत इदमुदयत्यर्चिषो यद्वदग्ने,
स्तं विश्वाशेषभावान्तरगतममलं स्वात्मदेवं नतोऽस्मि ॥११॥

यस्येच्छया गुणिन्यां प्रतिकृतिरभवत्कालतत्त्वं यदन्तः,
सन्त्यण्डाणूत्कराः प्रोद्गमपतनपरा एतदामृश्य सन्तः ।
लीयन्ते यत्र सत्त्वोज्झितचिररजसो दृष्टिमुद्यम्य कृत्स्ना,
स्तं मुक्ताधारतत्त्वं भृशविरतमिदं स्वात्मदेवं नतोऽस्मि ॥१२॥

यो विस्फार्यात्मनीत्थं त्वनुविशति कलाग्रामतत्त्वोत्थपूगान्,
भावाभावात्मतज्जं फलमिह च धियाश्नाति वेद्या रमन्त्या ।
यर्हीदं ब्रह्मवेद्याखिलमटति तदैकत्वमात्मन्यभेदे,
तं वेद्याभिन्नतत्त्वं शिवममृतमजरं स्वात्मदेवं नतोऽस्मि ॥१३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यस्येच्छामात्रपाताच्छवलगुणलसद्विश्वविख्यातिहेतु,
निश्चैतन्याद्धरान्तःकृतिमयमुदितं वेदगर्भं मनो वै ।
त्यक्त्वाऽस्मिन्यत्रलीनेचिरमलमखिलं लीयते यच्चकिञ्चित् ,
तं नित्यं शुद्धबुद्धंविकृतिविरहितं स्वात्मदेवं नतोऽस्मि ।।१४।।

गेहान्तर्गेहकञ्जासनरतगृहराद्यः प्रियाश्लिष्टमूर्तिः ,
स्वान्तःस्थानत्रयं निर्मितमिदमनया यद्विनोदाय तत्र ।
योऽश्नाति प्रैष्यचेटीरितमुखमुभयोस्तत्तयाश्लिष्य चान्ते,
तं सर्वाण्डैकपालं पृथुविभवभुजं स्वात्मदेवं नतोऽस्मि ।।१५।।

मृत्योर्वक्त्रान्तरस्थं करणगतिगतं दृश्यवर्गं विशालं,
दृष्ट्वास्माद्यं विविच्यान्तरगतमलंमेधयात्मानमेकम् ।
प्रोज्भयानात्मात्मसत्तांविदुरमलधियोत्रह्मवाक्यात्मतत्त्वं,
तं शुद्धं नित्यमुक्तं चितिसुखविभवं स्वात्मदेवं नतोऽस्मि ।।१६।।

संसारेऽस्मिन्नसारे स्फुरितबहुविकारे नियत्या विलासे,
सर्वादेर्नाटकस्याखिलनटनकलावेदिनो नाट्यसारे ।
साक्षी नित्योदितो यः परिलसति तया तेन चैकेनभिन्नः ,
क्रीडन्तं मायया तं निजबलनिचितं स्वात्मदेवं नतोऽस्ति ।।१७।।

योऽण्डान्तर्गेहतिष्ठज्जननिकरमनोयन्त्रगर्भस्थदीपे,
नानाच्छिद्रोच्छलद्भाःस्फुरतिनिकटदूरस्थितानां क्रमेण ।
जन्तूनां त्वन्धदृष्टेर्निजनयनरुजा नान्तिकस्थोऽभिमाति,
ज्ञानाह्लादस्वभावं तमपगतमलं स्वात्मदेवं नतोऽस्मि ।।१८।।

देहाद्युत्थानहेतू घटितचिरमलावाशयस्पन्दबाहौ,
प्राणापानौ नियम्योरसि विमलधियाच्छिद्य संशीतिबन्धान् ।
स्वस्थं पश्यन्ति साक्षाच्छुचिमतियतिनो यं विनिर्धूतमोहाः ,
प्राणापानान्तरस्थं तमुभयविकलं स्वात्मदेवं नतोऽस्मि ।।१९।।

गोभिर्निह्नुत्य मानैर्मितमिदममलः प्रज्ञया योऽर्च्यते ज्ञै,—
र्यच्छ्वासान्निसृताभिर्यतसकलधियां ज्ञापनायानुमानैः ।
यं बुद्ध्वा स्वानुभूत्यात्म विरतभिदं नान्यदस्तीह वेद्यं,
तं चिन्मात्रैकमूर्तिं चरममतिगतं स्वात्मदेवं नतोऽस्मि ।।२०।।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

जन्मस्थित्यन्तनाश्यं निजनियतिवशाद्योऽस्य विश्वस्य चित्रं,
कृत्वा मात्राभिरीशस्तिसृभिरभिलसन् पश्यति स्वासनस्थः ।
स्वस्मिन्निच्छाविरामेऽखिलमभिरमते ताभिरावेश्य साकं,
तं मात्राभिन्नमूर्तिं प्रणवमविकलं स्वात्मदेवं नतोऽस्मि ॥२१॥

मायाभूम्यः स्वयं सा परचितिजलधेर्गर्भितांशेन यस्य,
तस्याः खं वायुरग्निर्व्यसृजत सलिलं भूश्च तेभ्योऽण्डमेतत् ।
तद्‌गर्भस्थाश्च भावाः कृतिरिव कनकाद्यन्मयं तत्समस्तं,
तं विश्वाध्यासशून्यं विमलचितिनभः स्वात्मदेवं नतोऽस्मि ॥२२॥

बाध्यो दृष्टः क्वचिन्नोदयलयविभवैर्भासको भास्यभावे,
बाधश्चेद्‌बाधितुं स्वं पटुरथ कलया यं कया ब्रूहि तां मे ।
तद्यो बाध्योऽर्थवत्यात्मनि विरतमलैः सद्भिरीद्योऽयमात्मा,
तं भूतं वेदगीतं द्रु तदुरितगणं स्वात्मदेवं नतोऽस्मि ॥२३॥

योऽन्योन्यं भिन्नधर्मास्तनुखमतिमनः प्राणतन्मात्रभावान्,
बाह्यानर्थाश्च भासा कलयति रविवत्प्राप्य तत्तन्मयत्वम् ।
एभ्यो द्वयस्तोदयान्तद्वयमलरहितो दृश्यते सूक्ष्मधीभि,—
स्तं विश्वान्तर्विशुद्धं सलिलजलजवत् स्वात्मदेवं नतोऽस्मि ॥२४॥

उत्पद्योत्पद्य घूर्णज्जगदणुनिचया भेदसंभिन्नभावाः,
लीयन्ते यस्य भान्तःशिखिन इव करणा इत्थमालोच्य तज्ज्ञाः ।
हृत्खेऽर्थास्तोदयाभ्यां दधति न विकृतिं यत्‌सुखा मग्नचित्ताः,
स्तं सद्वाग्वार्धिगर्भोदितकचदमृतं स्वात्मदेवं नतोऽस्मि ॥२५॥

यो भावेषूदितेषूदयति नहि कदा क्षीयते वा क्षितेषु,
नैयन्त्र्येणाखिलानां कृतिविकृतिदशाबोधकस्त्वन्यथा चेत् ।
स्मृत्यादेर्भंगपातान्न तदत उदयाद्यः स्मृतेः पूर्वभूत,—
स्तं दिक्कालाद्यतीतं विभुमखमनखं स्वात्मदेवं नतोऽस्मि ॥२६॥

स्वस्माच्छक्तिद्वये यः पृथगिव विहितो बिम्बितो भाति तत्र,
लब्ध्वा हेतुत्वमेकोऽखिलकृति फलदृग् दीप्यते स्वस्य भासा ।
❀आस्वा कार्यत्वमन्यो निजकृतिफलभुक्तल्लयो यत्र बोधात्,
तं द्वैताद्वैतशून्यं सदसदतिगतं स्वात्मदेवं नतोऽस्मि ॥२७॥

❀ चिन्त्यमेतत्

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

संविद्वित्तासु श्रोत्रेक्षणमुखरसनाचर्मकर्माजिराणां,
व्यापारप्रोततत्त्वात्प्रथितमयि विभुं बुध्यते यं न कश्चित् ।
लोकेऽश्नन् दुःखपूगान्जनिकृतिमृतिजान्भिन्नवेद्यात्तदृष्टि,
स्तं भिन्नाशेषभूताशयकृतनिलयं स्वात्मदेवं नतोऽस्मि ॥२८॥

यस्यैका भोक्तृ भोग्येन्द्रिय विविधदशामात्मनो याति संवित् ,
स्वप्ने तद्वद्वितर्क्येन्द्रियविषयगतौ साधवोऽभ्यासदार्ढ्यान् ।
त्यक्त्वा वैवर्त्यदृष्टिं सहजपदविदो यत्रविश्रान्तिमापु,—
स्तं वेद्यावेद्यशून्यं त्रिपदपदगतं स्वात्मदेवं नतोऽस्मि ॥२९॥

स्वान्तर्गं वस्तुचक्रं पृथगिव विसृतं भाति स्वप्नेऽखिलानां,
तस्मात् सर्वं स्वतत्त्वं समविषमदृशार्जागरे[१] बोधतो यत् ।
विश्वं वैषम्यशान्तावतिसुखदमिदं विद्यते यस्य बोधात् ,
तं विद्वन्मोहनाशं स्फुरितनिजपदं स्वात्मदेवं नतोऽस्मि ॥३०॥

व्याप्येमान् दृश्यवर्गांस्तनुकरणधियां व्यापृतेः सत्यकल्पां—
स्तत्संस्कारात्तचित्तोदितबहुविषयान् यश्च शेते सुखादः ।
नो चेद्वृत्त्यन्तरोत्थस्मृतिगतपदहृक्केन तद्योऽ त्रचैक,—
स्तं तुर्यं सत्यतर्कोदयकरमतुलं स्वात्मदेवं नतोऽस्मि ॥३१॥

वक्तुं न स्वेन शक्या जगदिदममले निर्मिमीते विचित्रं,
यस्मिञ्चित्खे कलाहाटक इव विकृतीर्नामरूपक्रियाभिः ।
तद्यो मालेव वेद्योऽमलमतिभिरहेर्हेद्रृदृष्टेर्विनाशात् ,
तं मायाध्वान्तनाशोद्यतविमलरविं स्वात्मदेवं नतोऽस्मि ॥३२॥

विश्रान्तिर्यत्रपूर्वार्जितविशदघृषामृष्टचिद्दर्पणाना—
मीशानावेशपातोल्लसितपदयुगामर्शामग्नाशयानाम् ।
जीवेशोपाधियुग्मत्त्यजनतिदृशां तुर्यतत्त्वाश्रयाणां,
तं गुर्वाम्णायवाक्योन्मिषितशुचिपदं स्वात्मदेवं नतोऽस्मि ॥३३॥

यच्छक्त्या व्यञ्जितं जृम्भत इदमणुचिद्दर्पणान्तर्निगूढं,
नानालोकाध्वतत्त्वयातभिदममलप्रज्ञयामर्शभाजाम् ।
यस्मिन्याथात्म्यतत्त्वे पतति विमलदृक्त्वस्य वैकृत्यहानात्,
तं प्रज्ञानं बृहन्तं विमलसुखघनं स्वात्मदेवं नतोऽस्मि ॥३४॥

१ चिन्त्यमेतत् दृशि जागरे इत्येष शुद्धपाठः प्रतीयते

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सर्वं चिच्चेत्यशून्यात्मनि चितिकलया शिल्पिना चिन्मये—
नोत्कीर्णं येनाश्मचित्रोपमकमिदमतच्छिन्नभोमात्रमेव ।
विज्ञायाकाशकोशोयमविमलहृदो यन्मया भान्ति सन्त,—
स्तं भानन्दार्णावान्तर्जगदणुकणिकं स्वात्मदेवं नतोऽस्मि ॥३५॥

वेद्यार्थेभ्योऽक्षचक्रं परसुखविमलं मृत्युसन्त्रस्तबुद्ध्या,
व्यावर्त्यास्माच्च चेतोऽमलयतनजुषो यत्र सन्धिमुपेत्य ।
सञ्जीवन्मोक्षसौख्यं विगतभवभयं ❀भुञ्जतेऽसो र्लयान्तं
सत्यं ज्ञानमनन्तं तमुभयपदगं स्वात्मदेवं नतोऽस्मि ॥३६॥
चिच्छर्मेच्छाविदीहानुदयरसनिधेः शक्तिगर्भोऽहमात्मा,
यस्मात् स्पन्दोऽग्रिमो यस्तत इदमुदितं तत्त्वचक्रं धरान्तम् ।
तस्मात्तन्मात्रमेवोदयति यदुदधेः किंतु वीच्यादिभिन्नं,
तं राजच्छक्तिचक्रप्रथितनिजतनुं स्वात्मदेवं नतोऽस्मि ॥३७॥
स्वेच्छास्फारण्ततत्त्वो विहरति निजचित्स्फारितानन्तपूर्षु,
विस्फूर्तीः स्मृत्यपोहात्पुरुविकृतिदशा योऽस्ति नैज्यान्नभिन्नः[१] ।
स्वामर्शादाप्तबोधो लसति निजपदे संहृताशेषशक्ति—
स्तं शक्तिव्रातलीलामुदितनिजहृदं स्वात्मदेवं नतोऽस्मि ॥३८॥
सच्छक्तेर्यस्य ब्रह्मा जनिकृतिनिपुणोऽशेषविश्वस्य सृष्टे—
श्चिच्छक्तेर्विष्णुरुत्थो धृतिपटुरविता भाति नैयन्त्रयशक्त्या ।
संभूतोऽह्लादशक्ते र्विंशति शिव उशद्धाम्नि संहृत्य सर्वं,
तं लीलाव्यक्तशक्तित्रयतनुमतनुं स्वात्मदेवं नतोऽस्मि ॥३९॥
विश्वाब्धिं मोहसर्पत्पुरुविकृतिदशानच्छवैरस्ययातं,
नानाभावाम्बुपूर्णं श्रुतविमलधियामर्शवत्या विगाह्य ।
पीत्वा यस्योद्धृतं चिद्रसममलविभं सन्ति सन्तः कृतार्था—
स्तं सर्वप्रोतत्तत्त्वं परमजरमजं स्वात्मदेवं नतोऽस्मि ॥४०॥
मातुर्मेयस्य भेदाद् भवति चिदचितोर्नैकसत्तेति चेत् स्यात्,
तर्ह्येमा बन्धमोक्षोदयलयगतयो न् स्फुरेयुः क्रमात्ताः ।
सत्तैका यस्य तत्र व्यवहृतिशमयोर्योजनात् ख्यायतेऽद्धा,
तं सर्वार्थैकसत्ताश्रयविमलपदं स्वात्मदेवं नतोऽस्मि ॥४१॥

❀ चिमृश्यैतत्
१ चिन्त्यमेतत् नैजान्नभिन्नः इति शुद्धः पाठः प्रतीयते

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

शून्ये खाद्यत्र तत्त्वैर्पितमिदमकले ख्यातिमात्रोत्थचित्रं,
मिथ्या भानार्थभानैर्निजमतिविलयान्नीलता व्योम्नि यद्वत् ।
चर्व्यन्ते योनिचक्रान्तरपुरुकदनास्तेमुहुर्मौख्यसंस्थै—
स्तं भानाभानधर्मोज्झितविशदविभं स्वात्मदेवं नतोऽस्मि ॥४२॥

चित्तादेर्लुण्ठिकास्याशुभजनिधरणिर्निश्वरैर्भावजालैः
सत्कल्पावेद्यदृष्टिर्निजपदपतनाद् भाति यस्याप्रथोत्था ।
हित्वाद्यैः किंस्विदेरश्चिदुदयखचितैरात्मगं यं विदोत्थां—
स्तंमायाकार्यसत्ताप्रदममलदृशा स्वात्मदेवं नतोऽस्मि ॥४३॥

नानावस्थाशयेपूदक पुरुरचनाभेषु भिन्नेष्वहन्ता—
स्त्येकारा तदन्तर्लसिततनुरयं साक्षितो यश्चिदात्मा ।
भङ्क्त्वाहंवादिवादान् घनमिव सुधिया ख्यायते वायुनार्के—
स्तं वालस्त्र्यादिजीवानपलपिततनुं स्वात्मदेवं नतोऽस्मि ॥४४॥

यश्चिद्धान्वंशगर्भे कचति जगदणुर्मातृमेयप्रमाण—
ज्योतिष्कालक्रमाद्यैर्भरिततनुरतो वेत्ति कस्तन्महत्वम् ।
भङ्क्त्वापातेन शक्तेरणुरपि सकलं याति यत् साम्यमद्धा,
तं सद्भक्तार्तिवेगश्लथिततदृढपदं स्वात्मदेवं नतोऽस्मि ॥४५॥

चित्रं शक्त्योच्छ्रितं चित्कचनमिदमणौ स्वप्नसर्गोपमानं,
केषां चिद् भाति मोहाच्छुरितनिजमनोमानितैर्भावभेदैः ।
अन्येषां शक्तिपातोन्मिषितपददृशां भक्तिभाजां हि तादृक्,
तं चिच्चेत्यान्तरस्थं विरतमितकलं स्वात्मदेवं नतोऽस्मि ॥४६॥

षट्त्रिंशद्भावचित्रं सितरुचिकृतियुक् स्फारितं शून्यभित्तौ,
शक्त्या येन प्रमात्रा करणगणखिलेनाङ्कितं चिद्रसेन ।
सत्ता स्फूर्त्यादिधर्मैर्विशदमतिजुषां शिल्पिनं ज्ञापयत्स्वं,
तं शक्त्याश्लिष्टतत्त्वंशिवममलदृशं स्वात्मदेवं नतोऽस्मि ॥४७॥

चन्द्रार्कौ यस्य शक्तेरनुदिनमुदयं प्राप्य संस्फार्य भासा—
मायाखण्डाणुगर्भस्थितिविविधकलकार्यहेतूदयान्ताः ।
संयातोऽस्तं यदन्तर्जलमिव जलधौ स्वैरमेतौ क्रमेण,
तं स्पन्दाकारमाद्यं सकलतनुगतंस्वात्मदेवं नतोऽस्मि ॥४८॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

पूर्णत्वाच्चित्पराख्या करणगतिपरा भात्यावीच्यविकल्पा—
यच्छक्तिः शब्दगर्भान्तरिततरुदलाद्यष्टिवत् प्राणयोगात् ।
शब्दार्थज्ञानरूढा ध्वनिभिरपि जगद्व्यापृतीर्व्यञ्जयन्ती,
तं पूर्णं शान्ततत्त्वं शिवममलविभं स्वात्मदेवं नतोऽस्मि ॥४९॥

येनोट्टङ्कय सुशक्ताविदमुरुकलया भावचित्रं कयाचिद्—
रञ्जित्वा चिद्रसेनाद्भुतपुरुरचनं निर्मितं यत्प्रकृत्या ।
मेध्यामर्शेन भित्त्वा त्रिपुरमिदमगुर्यच्छिवत्वं हि केचित्,
तं चित्रानन्तशक्तिप्रसरशिवभुवं स्वात्मदेवं नतोऽस्मि ॥५०॥

षट्त्रिंशत्तत्त्वरूपं सदसदिदमलं मोहने चित्रगुम्फै—
रख्यातेः ख्यातिमत्स यदि परसुकृतात् ख्यातितो यस्य नश्येत् ।
सत्तत्त्वामर्शभाजां नयति सुखनिधिं हेतुशून्यं तदेदं,
सर्वं तं चित्प्रकाशाच्छुरितरसघनं स्वात्मदेवं नतोऽस्मि ॥५१॥

पूर्णाहन्तामुखेनोदनमिव कवलीकृत्य विश्वं विचित्रं,
लब्ध्वा जीवच्छिवत्वं त्यजदधरदशोऽद्वैतशाम्यद्धृषीकाः ।
स्वात्मैक्यध्येन पीतमृतरसमुदिता यत्र सन्तो रमन्ते,
सर्वालोकधामाकृतकसुखघनं स्वात्मदेवं नतोऽस्मि ॥५२॥

इत्थं सद्वस्तुतन्त्रावगतिपरिचयोग्रानिलास्ताप्रथाभ्रो,
व्यक्तद्वैतान्धनाशास्त्रवदमृतकचत्ग्रन्थिजालैकहंसः ।
लीढ्वा जीवदशायां शमसुखमनिशं प्राक्क्रियाभोगनाशात्—
स्वान्तर्लीनामलस्वर्वियदिव वियति ब्रह्मणि श्लिष्यते सः ॥५३॥

आसीत् सह्लसकाक आत्मरमणस्त्रस्तात्मसर्वाशयः
सद्विद्याधरकोऽस्तिशैवनयदृग्दृष्टात्महर्षोत्करः ।
शान्तःकौलनिधानकोऽभवदमून्नत्वा गुरून्सच्छ्रुतं,
स्वामर्शाय शकेऽञ्जखाष्टकुमिते १८०१ श्रीवासुदेवो व्यधात् ॥५४॥

"शुभमस्तु सर्वजगताम्"

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ब्राह्मी विद्या

काश्मीरिक

पंडितवासुदेवकृतटिप्पणोपेता

ॐ नमो भगवते वासुदेवाय ॥

ब्राह्मी विद्यां पाठकानां स्वतत्त्वा—
विद्याध्वंसं टिप्पणेनाखिलानाम् ।
ब्रह्माद्वैतं दर्शयन्ती प्रकुर्यां,
कृष्णं ध्यात्वा चिन्मयं श्याममूर्तिम् ॥

ननु गुणातीतस्य चिन्मयस्यात्मनः सुखदुःखादि भोक्तृमयत्वं जीवत्वं कथमुच्यते ?

ॐ—ॐ—ॐ त्रिगुणपुरुष[१] ! ॥१॥

---

१ ॐ ननु पूर्वानुष्ठितेश्वराराधनरूपनिष्कामकर्मशोधितान्तःकरणाधिगतशमदमादिसाधन चतुष्टयोत्पन्न ब्रह्मजिज्ञासावतां पुरुषधौरेयाणां किमुपदिशति-आचार्यः ? इति । एतां निर्विघ्न-सिद्धिनिष्पत्त्यर्थं मंगलपूर्विकामधिकारिपुरुषाय, ब्राह्मीविद्यामाह;— 'ॐ, ॐ, ॐ, इति ॥ विश्वान्तर्गतसर्वजीवोच्चारणमात्र कार्यानुकूलमंगलविधाता प्राथमिकः 'ॐ' इति शब्दः ।

'ओंकारश्चाथ शब्दश्च द्वावेतौ ब्रह्मणः पुरा ।
गण्डौ भित्वा विनिर्यातौ तेनोभौ मंगलावहौ ॥'

इति श्रुतेः । 'मंगलायतनं महत्' इति स्मृतेश्च ।

ननु कस्त द्विधाता ? इति चेत् ? तत्राह—विश्व—तैजस—प्राज्ञपादत्रयात्मकाकारो-कारमकारमात्रात्रयमयसकलविश्वस्वरूपो द्वितीयः 'ॐ' इति शब्दः ईश्वरशब्दवाची ओमित्येतदक्षरमिदं सर्वम्' (माण्डूक १) इति श्रुतेः । तद् ध्यानेन विश्वोपासना चित्तशुद्धिहेतुः (निबन्धंना)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

माया कार्यसत्त्वादिगुणात्मकपुरत्रयस्य ('अहमस्मि' (महाना० ६।७) इत्याभिमानं स्वाधीनीकृत्य शायिन् 'पुरत्रये क्रीडति यश्च जीवः' (कैवल्य० १४) इति श्रुतेः। कारणगुणात्कार्यगुणमुपलक्ष्यते; तयोरन्योन्यं व्यति रेकाभावात्। तथोक्तम् 'मृत्तिकायां घटस्तन्तौ पटः स्वर्णेऽङ्गुलीयकम्' इति। गुणत्रयं सुखदुःखादि, तत्तु चेतनप्रतिबिम्बमन्तरेण सत्तां न लभते। तस्मात्सुखदुःखादिमयो जीव उच्यते इति। तथा श्रुतिः,— 'स्वप्ने स जीवः सुख दुःख भोक्ता' (कैव० १३) इति ॥१॥

किं तद्गुणकार्यं यत्रायं जीवः संसक्तिमापद्यते तद्भावमाह, --

क्षेत्रचर ! ॥२॥

क्षेत्रे पञ्चीकृतापञ्चीकृतमहाभूतांशसम्भूतदेहादिप्रकृत्यन्तसङ्घाते शरीरे कृषीवलवत्केदारे चरति। सत्तादायकक्षेत्रज्ञरूपेण प्रवर्तते। अश्नाति कर्मफलभोगमिति वा, तस्य सम्बोधनं।

'स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम्' इति श्रुतेः (कैव १।१२) ॥२॥

केनोपायेन तदुपाधिर्निवर्तते ? यथा स्वं तत्त्वं प्राप्नुयात्। तदाह -

मोहं भिन्द्धि ॥३॥

मोहयति स्वरूपमावृत्यान्यथा ग्राहयति। स्थाणवाद्यावृतचौरादिविक्षेपहेतुरन्योन्याध्यासरूपो मोहस्तं यथाभूततत्वावरणदेहादिविक्षेपहेतुनानाभेदरूपमविद्यावरणं भिन्द्धि। 'तत्त्वमसि' आदि महावाक्यजन्यैकबोधेन विदारय ॥

'सर्वं खल्विदं ब्रह्म', (त्रि० म० ना० १।३) ॥ 'नेह नाना नास्ति किञ्चन' इति श्रुतेः (आध्यात्मो०) ६३ ॥३॥

ननु कार्यनिवृत्त्या कारणनिवृत्तिर्भवति, न साक्षात्कारणस्य, सूक्ष्मत्वात्। तरुच्छेदे बीजाभावात्, इति दर्शयति—

निर्दिष्टा मूलसेकशाखासेकनवतरोरिति भावः॥ [ननु तत्तद्रूपत्वमस्य स्वाभाविकं नैमित्तिकं वा ? नाद्यं,—जीवन्मुक्तानामनिर्मोक्षप्रसङ्गात् ॥ द्वितीयं तु शुक्तिकारजतवदिति सूचनया वदति ॥ मात्रातीताचिन्त्याव्यक्तैकात्मप्रत्ययसारनित्यशुद्धबुद्धमुक्तस्वभावस्तृतीयः 'ओं' इति शब्दो मायोत्तीर्णनिष्कलब्रह्मवाचक उपोद्घातत्वेन प्रदर्शित इति॥ तथा च श्रुतिः '['अमात्रश्च-तुर्थो व्यवहार्यः प्रपञ्चोपशमः शिवोऽद्वैत एव सोङ्कारः। आत्मैव विशत्यात्मानम्' इति (माण्डू० १२) ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रजस्तमसी भिन्द्धि ॥४॥

निखिलबन्धननिमित्तविषयाभिलाषरूपरजः,तत्त्वावरणरूपतमसी, शुद्धसत्त्वप्रतिभेद बोधेन दूरीकुरु। तदनन्तरं स्वात्मतत्त्वाधिगतिर्भवेदिति भावः। श्रुतिः;—

'ज्ञात्त्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशै र्जन्म मृत्यु प्रहाणिः'। इति श्वेता० १।११ ॥४॥

ततोऽनायासत्वेन कार्यकारणनाशो भवेत् इति निगदति—

प्राकृतपाशजालं सावरणं परिहर ॥५॥

मोहकल्पितदेहाद्यभिमानधर्मिजीवत्वप्रतिपादकरज्जुबन्धनकारि रागद्वेषादिकं सकलानर्थहेतुसच्चिदावरणीभूतबीजनिद्रा सहितंसकलनिगमशिरोभूतमहावाक्यजन्यतत्त्वं पदार्थैक्यबोधेन सर्वात्मना निकृन्तय ['तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते'] इति श्रुतेः कैव० १७ ॥५॥

ननु पूर्वोक्तमेतत्सर्वं निर्मलान्तःकरणस्य कर्तव्यं कथं तद्भवेत्? इत्याह,—

सत्त्वं गृहाण ॥६॥

रागद्वेषादिसर्वदोषनिकृन्तनं भगवद्भक्त्यादिरूपं शुद्धसत्त्वं रजस्तमसोच्छेदन—प्रयत्नेनादत्स्व 'श्रद्धा भक्तिध्यानयोगादवेहि' इति श्रुतेः। भगवद्गीतायामप्युक्तम्,—

'रजस्तमश्चाभिभूय सत्त्वं भवति भारत' गीता (१४।१०)।
इति ॥६॥

किं तद्ध्येयजातमात्मनःस्वाभाविकं नैमित्तिकं वा? नाद्यं, वह्नेरपि दहनशक्तेरुपरमोपपत्तेः। रज्जौ सर्पवद्द्वितीयं स्यात्। इति सूचयति,—

पुरुषोत्तमोऽसि ॥७॥

पूर्वं माया कल्पितक्षराक्षरोपाधिद्वयातीतःत्वमासीः। इदानीमपि पूर्वोक्तशुद्धसत्त्वग्रहणेन सर्वोपाधिनिर्मुक्तो भूत्वा पुरुषोत्तमो भवसि।

'यया चिरात्सर्वपापं व्यपोह्य परात्परं पुरुषं याति विद्वान्' इति श्रुतेः ॥७॥

सर्वानर्थमूलद्वैतोपाध्यभावात्पुरुषोत्तमत्वं साधयति,—

सोमसूर्यानल प्रवर ! ॥८॥

प्रमेय-प्रमातृ-प्रमाणरूपाचन्द्रादयस्तभ्यो यत्स्वयं प्रभत्वाच्छ्रेष्ठं प्रकाशानन्दरूपं यस्य तस्य सम्बोधनं। यद्वा यस्य प्रकाशांशपतनात्सोमादयो निखिलं जगत् प्रकाशयन्ति। तस्मात्सर्वप्रकाशश्रेष्ठ !

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

'येन सूर्यस्तपति तेजसेद्धः' इति। 'तमेव भान्ततमनुभातिसर्वम्' इति श्रुतेः (कठा० ५। १५) ॥८॥

कुतस्तत्? इत्यत आह,—

परमधामन् ॥९॥

सजातीयविजातीयसुगतभेदशून्या या चिल्लदमीस्तस्याः परमाणां ब्रह्मविदां जीवन्मुक्तानामपि वा विश्रान्तिस्वरूप!

'ध्यात्वा मुनिर्गच्छति भूतयोनिं समस्तसाक्षिं तमसःपुरस्तात्' इति श्रुतेः (कैव० ७) ॥९॥

तर्हि 'न तस्य कार्यं करणं च विद्यते' इति श्रुत्या (श्वेता० ६। ८) जगत्कार्याभावत्वं सूचितं कुतश्चास्य जगतो जन्मादयः सन्ति? इत्याशङ्क्य, मायया तां कार्यानुमानेन कलयति,—

ब्रह्मविष्णुमहेश्वरस्वरूप! ॥१०॥

मायाकल्पित, रजः-सत्त्व-तमो-मूर्ति त्रयग्राहक!

'परास्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च' इति श्रुतेः (श्वेता० ६। ८) ॥१०॥

तेषां कार्याण्याह,—

सृष्टिस्थितिसंहारकारक! ॥११॥

तत्तद्रूपग्रहणाज्जगज्जन्मादिविधायक! श्रुतिः,—

'पुरत्रये क्रीडति यश्च जीवस्ततस्तु जातं सकलं विचित्रम्'।

(कैवल्य १४) इति। अस्य जगतो नामरूपात्मकस्य कारणशक्तेः कार्यतयाभिव्यक्तिः सृष्टिः। कार्यस्य कारणसत्तया विचित्ररूपाधारणंस्थितिः। कारणमात्रपरिशेषात्मा कार्यतिरोभावःसंहार इति ॥११॥

तस्योपासना तत्वस्वरूपप्राप्तये कुत्रोपासकानां भवेत्। इति। तद्देशमाह,—

भ्रूमध्यनिलय तेजोऽसि ॥१२॥

इडापिङ्गलान्तरप्रकाशरूपसूक्ष्मनाड्यां स्थिताज्ञाचक्रान्तर्गतसकलकरणादिचैतन्य निर्वाहको योगीन्द्रगम्यश्चिद्बिन्दुरूपस्त्वमसि॥ श्रुति:,—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

'इडापिङ्गलयोर्मध्ये सुषुम्णाख्ये परे पदे।
प्रतिष्ठितं महादेवं तारकाकारसन्निभम्' ॥

इति ॥१२॥

ननु नासाभ्यन्तरचारि समीकृतप्राणापानाधिगतभ्रूमध्यधारणासंज्ञातचिद्बिन्दुतत्त्वस्यात्मनोऽधिष्ठानं किं ? यस्य ज्ञानेन तद्वेदनं भवेत्।—यथा श्रुत्युक्तैकेन मृत्पिण्डेन विज्ञातेन सर्वं मृण्मयं विज्ञातं भवति, इत्येतदाह—

धामासि ॥१३॥

सकलप्रकाशकरसूर्यचन्द्रादिप्रकाशानामधिष्ठानतया निर्गमप्रवेशस्थानं त्वमसि ॥

'येन सूर्यस्तपति तेजसेद्धः' इति। श्रुतेः।

'ज्योतिषामपि तज्ज्योतिः' गीता (१३।१७) इति स्मृतेश्च ॥१३॥

कथं तत्र सर्वं भाति ? इति चेत्, तत्राह—

महात्मन्! ॥१४॥

महदैश्वर्यवतां ब्रह्मरुद्रादीनां यदीयैश्वर्यविप्रुड्भिर्निजनिजाधिकारे सामर्थ्यवतां जगति पूर्णब्रह्मप्राप्तत्वेन पूज्यतमानां वान्तर्यामिस्वरूप!

'यं सर्वे वेदा न विदुर्यस्य सर्वे वेदाः शरीरं सोऽन्तर्याम्यमृतः'। इति श्रुतेः। अध्यस्तनिखिलमहाभूतादिप्रपञ्चाधिष्ठानस्वरूप! वा

'महतो महीयान्' इति श्रुतेः। (कठो २। २०)

'महानहं विश्वमिदं विचित्रम्' इति श्रुतेः (कैव० २। १)।

'सर्वभूतान्तरात्मा'। इति श्रुतेश्च (ब्रह्म० विं० १०५) ॥१४॥

कोऽसौ ? यत्र योगिनो धारणामुपनिबध्नन्ति। तदाह,—

ओं ॥१५॥

जाग्रदाद्यवस्थात्रयात्मकाकारोकारमकारमात्रात्रयशब्दब्रह्मस्वरूपः प्रणवः।

'सोऽयमात्मा चतुष्पाज्जागरितस्थानो बहिःप्रज्ञः सप्ताङ्ग एकोनविंशतिमुखः स्थूलभुग्वैश्वानरः प्रथमः पादः। स्वप्नस्थानोऽन्तःप्रज्ञःसप्ताङ्ग एकोनविंशतिमुखः प्रविविक्तभुक्तैजसो द्वितीयः पादः। यत्र सुप्तो न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति, तत्सुषुप्तं सुषुप्तस्थान एकीभूतः प्रज्ञानघन एव ह्यानन्दमयो ह्यानन्दभुक् चेतो मुखः प्राज्ञस्तृतीयः पादः। शिवमद्वैतं चतुर्थं मन्यन्ते'। इति माण्डूक्यश्रुतेः माण्डू० २ ॥१५॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सत् ॥१६॥

परोक्षवाचित्वादीश्वरस्वरूप ! ॥१६॥

सत् ॥१७॥

अन्योन्यव्यभिचारदशात्रयावशिष्टनिखिलदृश्यवर्गसत्ताप्रदातृत्वादबाध्यस्वरूपः 'ज्ञानान्तरेण विषयासत्वप्रतीतिर्बाधा। शुक्तिकादावारोपितस्य रज्जुनादे (रजतादे) र्विवेकज्ञानेन बाध्यत्वं, न तथा बाध्यत्वमस्याकल्पितत्वाद्रूपान्तर प्राप्त्यभावाच्च। यत्किञ्चिदवशिष्यते इति श्रुतेः।

'वाचारम्भणं[1] विकारो नामधेयं मृत्तिकेव सत्यम्, इति श्रुतेः छान्दो० (६।१।४) ॥१७॥

ननु मनो वागविषयं निष्प्रपञ्चं ब्रह्म कथमुपदिशन्ति सच्छिष्यायाचार्याः? अध्यारोपापवादाभ्यां प्रत्यगभिन्नब्रह्मसाधनाय श्रुतिदेवी निगदितश्रोतृबुद्ध्यारोहणक्षमतटस्थस्वरूपलक्षणैस्तानिह प्रपञ्चयति—

हंसःशुचिषद्वसुरन्तरिक्षसद्धोतावेदिषदतिथिर्दुरोणसत्, नृषद्वरसदृतसद्व्योमसदब्जा, गोजा, ऋतजा, अद्रिजा, ऋतम् ॥१८॥

सर्वभूतानामवस्थात्रये ऽन्तर्यामिस्वरूपेण हन्ति संचरति सत्स्वरूपपरामर्शभाजां निखिलजगन्मोहमूलामविद्यां निराकरोति—इति वाचित्वात्सूर्यः।

'तुरीयं त्रिषु सन्ततम्'। इति श्रुतेः।

'तरति शोकमात्मवित्' (छां० ७। १। ३) इति श्रुति द्वयम् ॥१८॥

ननु येन यथानुभूतं यद्वस्तु, तस्मात्तद्वस्तुतत्त्वविषया वागन्यं प्रतीदं वस्त्वीदृशमित्येवं रूपा निर्याति। अनुभवस्तु द्विविधो दृष्टप्रत्ययरूपः श्रुतिप्रत्ययरूपः। तद्यथानुभूतादित्यस्वरूपश्चक्षुष्मान् पुरुष आदित्यस्वरूपं जिज्ञासुमन्धं पुरुषं प्रतीदृक्स्वरूपोऽयं सूर्य इति वदति। सच तथानुभवति। कथमविषयमात्मतत्त्वमनुभवति पुरुषः। वैराग्यादिसाधनैः शोधिते चिद्दर्पणे वृत्तिव्याप्तया साक्षाद्भासितमात्मतत्त्वमनुभवंस्तस्यैवान्यबोधने सामर्थ्यम् — इति सूचनया प्रकटयति—

शुचिषत् ॥१६॥

शमदमादिसाधन चतुष्टयशोधितान्तःकरणानां पुरुषवीराणां हृदयाकाशे सीदति—प्रत्यगभिन्नब्रह्मतयावर्तत इति।

---

१ मृत्तिकेत्येव,—इत्यपि पाठः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

['यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वाम्'। इति श्रुतेः (मुण्ड० २.३) ॥ एष साधको ऽयं परमात्मानं कीर्तनश्रवणादिभिः प्रार्थयते। तेनायमात्मा लभ्यः। तस्यैवात्मा सच्चिदानन्दात्मिकां मूर्तिं प्रकाशयति—इत्यर्थः ॥१६॥

ननु तर्हि तेषामेवान्तःकरणे स्थितमात्मतत्त्वं नान्येषामिति चेत्—

'सर्वभूतान्तरात्मा' (त्र०वि० १०५) इत्यादिश्रुतिवृन्दानां वैफल्यमायातं, न सामान्य-विशेषभावेन । द्विविधमात्मनो भासनमिति। तत्र विशेषमुक्तं ; सामान्येनाह—

वसुः ॥२०॥

वसन्ति सर्वाणि भूतानि यस्मिन् स सर्वाधिष्ठानस्वरूपः सर्वेषु भूतेष्वन्तर्यामितया वसति यः। इति वा ॥

'सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि'।
इति श्रुतेः गीता (६.२६) ॥२०॥

तर्हि सर्वान्तर्गतस्यात्मनो भासनं सर्वेषां किं न ? इति चेत्, तत्राह,—

अन्तरिक्षसत् ॥२१॥

सकलभूतात्मकधराद्यव्याकृताकाशपर्यन्तं स्वस्मिन् दत्तावकाशतया विद्यमानः सत्तास्वरूपो यस्य सः 'अक्षरमम्बरान्तधृतेः' इति व्याससूत्रम्—

'कस्मिन्नु खल्वाकाश ओतः प्रोतश्च गार्गि स्मिन्नक्षर आकाश ओतः प्रोतश्च'।
इति श्रुतेः (बृह० ३। ८। ७) ॥२१॥

तर्हि शून्यत्वं तस्मिन्नापन्नं न सर्वेषां फलदातृत्वात्। इत्याह—

होता ॥२२॥

समस्तदेवादीनां भगवदुक्तब्रह्मार्पणमिति श्लोकरीत्या चिद्वह्नौ महामृतहविर्दायक-स्वरूपः ॥

१

'ब्रह्मयज्ञो वा एष यत्पूर्वेषां चयनम'। इति। (मैत्रा० १।१०।१।१) 'तदपि ब्रह्म' इति भाष्ये। 'यज्ञो वै विष्णुः' इति। 'यज्ञेनैवयज्ञं सन्तनोति'। इति मैत्रेयश्रुतयः ॥२२॥

स्फुटमेवान्तर्यामित्वमात्मनो दर्शयति—

१ यचनम् इत्यपि पाठः।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

वेदिषत् ॥२३॥

वेत्ति विषयजातमनयेति बुद्धिवृत्तिः । सकलब्रह्माण्डान्तर्गतजीवव्रातान्तःकरण यज्ञभूमौ परप्रेमास्पदतया नियन्तृभावेन प्रवृत्तः ।

'यज्ञेन यज्ञमयजन्त देवाः' । इति श्रुतेः । (ऋ० अ० ८.४.१९)

'यज्ञो वै यजमानः' । इति च श्रुतेः ॥२३॥

ननु तस्यात्मनो विश्वोपाधिः स्वाभाविको नैमित्तिको वा ? नाद्यो जागराद्यवस्था-त्रयस्यान्योन्यविगलनेन तत्साक्षिणो न काचित्क्षतिः,—इत्याह—

अतिथिः ॥२४॥

अविद्यमानस्तिथिः, भूताद्यवस्थादिभिर्भेदरूपः कालांशो यस्य सः, कालकलङ्कशून्य इत्यर्थः ।

'नित्योऽक्षरोऽजस्रसुखो निरञ्जनः' । इति श्रुतेः ॥२४॥

किं लक्षणं पुनस्तद्‌ब्रह्म ? कार्यानुमानेन दर्शयति,—

दुरोणसत् ॥२५॥

व्यष्टिसमष्टिरूपे ब्रह्माण्डगृहे निवसतोर्जीवेश्वरयोश्चिन्मात्रतुर्यस्वरूपेण वर्तमानः ।

'यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ।

अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ॥'

इति श्रुतेः (महाना० ६ । ५) ॥२५॥

ननु ब्रह्मादिपिपीलिकान्तानां शरीराणामन्तरे किं तच्छरीरं प्रशस्तं? यद्‌ब्रह्मावलोक-धिष्ण्यमस्तीति तदाह,—

नृषत् ॥२६॥

अविद्याकल्पितजीवोपाधिषु मनुष्यादिषु बाह्यान्तरकरणानां चैतन्यदातृत्वेन प्रतिष्ठित इति । 'अयमात्मा ब्रह्म सर्वानुभूः' । इति श्रुतेः (बृह० २ । ५ । १६) ॥

'पुरुषे त्वेवाविस्तरामात्मा' । इति श्रुतेः (ऐत० ३ । २ । ३) ।

'अथ ताभ्यो गामनयत्ता अब्रुवन्नवै नो ऽलमिति ताभ्यो अश्वमानयत्ता अब्रुवन्नवै नो ऽलमिति ताभ्यः पुरुषमानयत्ता अब्रुवन्सुकृतं वत' इति च श्रुतेः ॥२६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

ननु भावजातानामन्तरे कुत्रापि साक्षादाविर्भावो वर्तत आत्मनःतत्र—

'यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ' ॥

इति भगवदुक्त श्लोकरीत्या (गीता १०/४१) । तदप्याह—

वरसत् ॥२७॥

जगति पूज्यत्वेन स्थितेषु सूर्यचन्द्रादिषु प्रकाशदातृत्वेन प्रवर्तमानः । येषु येषु प्रकाशमानं यद्यदतिशयमैश्वर्यं, तेषु तेषु तत्तद्भगवतो महत्वमिति भावः ॥

'येन सूर्यस्तपति तेजसेद्धः' । इति श्रुतेः ॥२७॥

ननु किं तदात्मतत्त्वं ? यद्विपश्चितामुपलब्धव्यं, परामर्शेन यदिन्द्रियषट्काणानामुपलयाधिष्ठानमित्याह,—

ऋतसत् ॥२८॥

ऋतेनावृतनिखिलशेषभूते परमार्थपदे चिन्मूर्त्या विश्रान्त इति ॥

'सत्यं ज्ञानमनन्तं ब्रह्म' इति श्रुतेः (तैत्ति० २ । १ । १) ॥२८॥

तर्हि तत्सत्यं वस्तु सर्वेषां किं न भाति ? इति चेत्, देशकालादिभिः शून्यं न शून्यं परमार्थतः' इति श्लोकरीत्या । तस्याविषयतामाह,—

व्योमसत् ॥२९॥

व्योम्नि मायाकल्पितनिखलवेद्यशून्येत्वेन निजानन्दात्मनि पराकाशे प्रतिष्ठितः ।

'अत्रायं पुरुषः स्वयं ज्योतिः' । इति श्रुतेः (बृह० ४ । ३ । ६, १४) ।

'यस्मात्परं नापरमस्ति किञ्चित् ' । इति श्रुतेः (श्वेता० ३ । ९) ॥२९॥

तर्हि शून्यावादिमतेष्टं शून्यत्वं तस्य, नात्मनः साक्षित्वेन मायाया नानाकार्यसद्भावादित्याह—

अब्जा ॥३०॥

सृष्ट्यादावापो जायन्ते, यस्मात्पश्चाद्ब्रह्माण्डरूपेण तदन्तरे ऽजायत यस्यांशः ।

'अप एव ससर्जादौ' ।

इति श्रुतेः ॥३०॥

'स्वयं सर्वमभवत् ' इति तापनीयश्रुतेरर्थं दर्शयति—

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गोजा ॥३१॥

गवि स्वर्गे,—इन्द्रादिरूपेण, अन्तरिक्षे-भानुरूपेण भुवि वाह्नौषध्यादिरूपेण प्रकटीभूतः ।

'परास्य शक्तिर्विविधैव श्रूयते'। (श्वेता० ६ । ८) इति श्रुतेः ॥३१॥

ननु मायाकार्याणां भावानामन्तः प्रविष्टत्वात्तेषां नाशे तस्यापि नाशः । नेत्याह—

ऋतजा ॥३२॥

ऋते सच्चिदानन्दस्वरूपे यथार्थवस्तुनि जायते तिष्ठतीति ।

'स्वे महिम्नि प्रतिष्ठितः'। इति श्रुतेः (मैत्रा ६ । २८) ॥३२॥

अनिर्वाच्यमव्यक्तमात्मतत्त्वं मुमुक्षुभिर्दृश्य-दर्शित-विचारेणोपलब्धव्यम् इत्याह—

अद्रिजा ॥३३॥

अद्रौ शरीरादिसङ्घातरूपे पर्वते विवेकिनां जागरादियुक्त्या हृदयाकाशे सच्चिदानन्दमयत्वेन प्रादुर्भवति य इति ।

'परेण नाकं निहितं गुहायां बिभ्राजते यद्यतयो विशन्ति'। (महाना० ८ । १४) इति श्रुतेः ॥३३॥

मायाकल्पितभावविकाराणामसत्वनिश्चयानन्तरमात्मतत्वं कीदृशं निश्चेयम् ?—इत्याह,—

ऋतम् ॥३४॥

आद्यन्तप्रपञ्चानारोपितवस्तुतत्वमिति ।

'अशरीरं वा वसन्तं न प्रियाप्रिये स्पृशतः'। (छान्दो० ८ । १२ । १) इति । 'निर्मलं निष्क्रियं शान्तम्'। इति श्रुतिद्वयात् ॥३४॥

अत्र रहस्यार्थदर्शकैरेतैः प्रशस्तविशेषणैस्तटस्थलक्षणज्ञापकैर्निर्णीयमानं यद्वस्तुतत्त्वं तस्य स्वरूपलक्षणं दर्शयति—

परं ब्रह्मस्वरूप ! ॥३५॥

निखिलवेद्यपारङ्गमतत्पूरकनित्यशुद्धबुद्धमुक्तस्वभावसकलब्रह्मक्रोडीकारिचिन्मात्र—स्वरूप !

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

'यत्परं ब्रह्म सर्वात्मा विश्वस्यायतनं महत् ।
सूक्ष्मात्सूक्ष्मतरं नित्यं तत्त्वमेव त्वमेव तत् ।।'

इति श्रुतेः (कैव १६) ।।३५।।

तर्हि मम किं न भाति ? कुत्रान्वेषयामीति चेत्तत्राह—

सर्वगत ! ।।३६।।

जले पद्मपत्रवत्सकलविकारनिस्यूतचिन्मात्रतयानिर्विकारस्वभाव ! त्वमपि तदनुवृत्या धियेदृशमात्मानमनुभवयेत्यर्थः ।

'आकाशवत्सर्वगतश्च नित्यः' । इति श्रुतेः ।।३६।।

तस्मान्न कस्यचिदपह्नवीय आत्मा, सर्वेषामहमित्यनुसंधाननिर्देशादादित्यवन्निजचित्किरणैः सुप्रकटस्तं निजबुद्ध्याहमितिविषयीकर्तुमशक्तो मोहावृतबुद्धित्वादित्यभिप्रायं सूचनयानुवदति—

सर्वशक्ते ! ।।३७।।

निखिल जगत्सर्जनादिषु यदन्तर्गतं सर्वप्रमातृजातं तस्य बाह्यान्तरकरणचक्रतद्विषयीभूतपदार्थचक्रनिर्वाहरूपाः शक्तयो यस्य तस्य सम्बोधनं ।।

'शक्तयोऽस्य जगत्सर्वं शक्तिमांस्तु महेश्वरः' ।

इति श्रुतेः ।।

'परास्य शक्तिर्विविधैव श्रूयते' । (श्वेता० ६ । ८ + भवसं० २ । ४४)

इति श्रुतेः ।।

कार्यानुकूलकारणनिष्ठसामर्थ्यं शक्तिः । यथा कुलालस्य घटादिनिर्माणशक्तिः ।।३७।।

ननु घटादिनिर्माणशक्तीनां कुलालादेरिव निजनिजकारणात्सत्तास्फूर्ते स्यातां । किं ब्रह्मणा ?—इत्याशङ्क्य तेषां कारणानामपि न स्वतः सत्ता । मायीयत्त्वयोदयस्वभावाधीनत्वात् । इत्यत आह—

सर्वेश्वर ! ।।३८।।

सर्वासां समष्टिव्यष्टिकर्तृकरणशक्तीनामीक्षणमात्रेण सत्ता स्फुरत्तानियामक ! यदि स्वस्वकारणेभ्यो जडत्वाच्छक्तीनां स्फुरणं तर्हि मायीयत्वाभावेन नित्यत्वापत्तावाविर्भावतिरोभावाभावाद्भिन्नानेकप्रमातृशक्तीनां च परस्परयोजनाभावाद्विषयेन्द्रियसंयोगासंयोगजन्य जागरादयोऽवस्था न स्फुरेयुः, तच्चानिष्टं । तस्मादेकस्मात्परमार्थतत्त्वान्मायाकल्पितसर्वप्रमात्रादिशक्तीनामुदयविनाशौ भवेतामिति भावः ।।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

'यः सर्वज्ञः स सर्वविद्यस्य ज्ञानमयं तपः'। इति श्रुतेः। (मुण्ड० १। १। ६)

'इन्द्रो मायाभिः पुरुरूप ईयते'। इति श्रुतेः (बृह० २। ५। १५) ॥३८॥

नन्वीदृशमपि बोधनं मम हृदि न माति। तत्र किं करोमि ?

इत्यत्राह—

सर्वेन्द्रियग्रन्थिभेदनं कुरु कुरु ॥३९॥

सर्वप्रमातृसमस्तबाह्यान्तःकरणवर्गेष्वन्योन्याध्यस्ततया चिच्छायामेलनरूपोऽहं जानामि पश्यामीत्यादिबन्धनरूपोऽहङ्कारस्तस्य तेभ्य उभयेभ्यो मिथ्यात्वनिश्चयेनावशिष्टस्यात्मनश्च सत्यत्वप्रतीत्या विधारणं विधेहि, चेत्तवेदृशस्य बोधस्यावाप्ताविच्छा स्यादिति भावः ॥

'न पुण्यपापे मम नास्ति नाशो न जन्म देहेन्द्रियबुद्धिरस्ति।

एवं विदित्वा परमात्मरूपं गुहाशयं निष्कलमद्वितीयम्'॥

इति श्रुतेः (कैव० २७)॥

'पौनरुक्त्यं न दोषोऽत्र शब्देनार्थेन वा भवेत्'। इति ॥३९॥

ननु त्वङ्मांसादिदौर्गन्ध्यविमर्शनात्क्षणक्षयदर्शनाच्च समुदितग्लानित्वेन विनश्यद्देहादौ भ्रान्तिजन्याहन्ताबुद्धिनिवृत्त्यनन्तरं किं मम कर्तव्यम्—?

तदाह—

परं पदं परामर्श ॥४०॥

विश्वाद्युपाध्युत्तीर्णं चिद्भासा समस्तपूरकं तुरीयं स्वरूपं समस्तोपाधिनिराकरणपूर्वकस्वात्माभिन्नतया परामर्श अनुसन्धत्स्व ॥ अत्र गुण आर्षः।

'विमर्शनं तु बुद्धिधर्मो स्थूलमनण्वह्रस्वमदीर्घम्। इति श्रुत्या, निरूपितस्य ज्ञेयातीतस्यात्मनो बुद्ध्युपारूढत्वं कथमुच्यते ? यथा सूर्यस्य जलपात्रे प्रतिबिम्बतया स्फुटं भासनं तथा बुद्धौ प्रतिबिम्बतया स्फुटमात्मनः स्फुरणम्। तत्र श्रुतिः

'मनसैवेदमाप्तव्यं' (कठो० ४। ११) 'एषोऽणुरात्मा चेतसा वेदितव्यः'। इति (मुण्ड० ३। १। ९)॥ न चास्मिञ्छ्रुतिद्वये बुद्धिग्राह्यत्वमात्मनः प्रतीयते, इति वाच्यम्।

'अप्राप्य मनसा सह' (तै० ३०२,४,९)॥ न मतेर्मन्तारं मन्वीथाः। (बृह० ३। ४। २) न विज्ञाते विज्ञातारं विजानीयाः (बृह० ३। ४। २)॥ यन्मनसा न मनुते' (केनो० १। ६)। इत्यादिश्रुतिविरोधदर्शनात्कस्तर्हि श्रुतिद्वयस्य परस्परविरोधार्थः ? इति चेत्, शृणु, 'मनसैवेदमाप्तव्यम्' (कठो० ४। ११)। इत्यादेर्वृत्तिव्याप्यत्वं विवक्षितम्। 'अमेयम्' इत्यादि

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

श्रुत्या फलव्यापित्वं निषिध्यते। फलव्याप्यत्वं तु फलेन तद्गतचिदाभासेन भास्यत्वं श्रुतिद्वयविरोधो न तथा। तदुक्तं "भारतीतीर्थैः"

'स्वप्रकाशोऽपि साद्‌ध्येष धीवृत्त्या भास्यते ऽन्यवत्।
फलव्यापित्वमेवास्य शास्त्रकृद्भिर्निवारितम्'॥

इति ॥४०॥

योगदृष्ट्याद्यबोधनं करोत्याह—

ब्रह्मद्वारं सर ॥४१॥

मूलादिषट्‌चक्रपरामर्शोद्घाटितसूक्ष्मनाड्यन्तरप्रावेशितप्राणापानकवलनोदितज्योतिर्मयोदानवह्निप्लोषितपूर्वापरमलद्वयदर्शितकरन्ध्रस्थितमहामृतचर्वणादुन्मीलितप्रबोधचक्षुषासाक्षात्कृतं ब्रह्म चैतन्यरूपं मोक्षद्वारं हेयोपादेयशून्यतया गच्छ जानीहि, इत्यर्थः॥

'श्रद्धाभक्तिध्यानयोगादवेहि'।

इति श्रुतेः॥४१॥

हेयतामाह—

कुमार्गं जहि ॥४२॥

कुत्सितदेहादिप्रमातृतायां कृत्रिमाभिमानरूपां सरणिं विमर्शाधिगतचित्तनिरोधात्खण्डय तदा स्वतत्त्वबोधसरणिमधिगमय। एतयोर्द्वयोरन्योन्यविरोधादिति भावः॥ तत्र श्रुतयः,—

'अथ यो ऽन्यां देवतामुपास्ते स मृत्यो मृर्त्युमाप्नोति। य इह नानेव पश्यति, यदा ह्येव एष एतस्मिन्नुदरमन्तरं कुरुते। अथ तस्य भयं भवति। कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातम्'। इति

'अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मत्कृताकृतात्। अन्यत्र भूताद्भव्याच्च (कठो० २।१४) ब्रह्म ते ब्रुवाणि यत्साक्षादपरोक्षाद्ब्रह्म ? यो ऽशनापिपासे शोकं मोहं जरामृत्युमत्येति'

इति ॥४२॥

ननु किं तत्सर्वोपाधिमूलभूतं यत्परिहारेण सर्वोपाधयो नश्येयुरित्याशङ्क्याह

षाट्‌कौशिकं शरीरं त्यज ॥४३॥

'प्रागुक्तं त्वयाद्यज्ञातं मया, इति कालः। किञ्चित्कृतं मया, न सर्वंकर्तुमलमिति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कला। नियतात्कारणान्नियतं कार्यमुत्पद्यते—यथा मृदो घटादिः। कर्मणा पितृलोकः। उपासनया देवलोकः। ज्ञानादेव तु कैवल्यम्,—इति नियतिः। स्त्र्यादिविकलेषु सकलेष्वहमेव विकलः सकलः। मानुभूवं हि भूयासमित्यात्मनि रागः। पुरोवर्ति घटादिकं किञ्चिज्ज्ञानामि न दूरव्यवहितं वस्त्विति विद्या। विचित्रभेदप्रथारूपा माया तत्षट्कोशनिर्भरं जल आमघटवच्छीर्यमाणस्वभावं। तत्र सकलानर्थहेतुभूतामहन्तां परिहर। तदा सकलोपाधिद्वयात्स्वात्मनि विश्रान्तिमाप्नोषि—इतिभावः। तत्र मैत्रायणी श्रुतिः —

'अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन स्वरूपेणाभिनिष्पद्यते इत्येष आत्मा'।

इति। अत्र समुत्थाय शरीराभिमानं परित्यज्येति भाष्ये ॥४३॥

उपादेयस्य वैराग्यादिपूर्वकसंविद्वेदनस्य फलमाह—

शुद्धोऽसि ॥४४॥

सर्वस्यात्मत्वेन हेयोपादेयत्वाभावात्परमार्थतो द्वैतमलरहितस्त्वमसि

'द्वितीयाद्वै भयं भवति'।

इति श्रुतेः (बृह० १।४।२) ॥ ४४ ॥

किं तर्हि स्फुटिकादिवन्निर्मलत्वे सति तार्किकाभिमतमचेतनत्वमात्मन आयातमिति चेन्न, स्वात्मनिजानन्दचमत्करणादिति तात्पर्यार्थमाह

बुद्धोऽसि ॥४५॥

मायीयं जडवेद्यवर्गं मायासहितं सूर्यतमोवद्भावपक्षे प्रतिपादितं। तस्माज्ज्ञप्तिमात्रं त्वमसि।

'विज्ञानमानन्दं ब्रह्म'।

इति श्रुतेः (बृह० उ० ३।९।३४) ॥४५॥

ततः किं? अत आह—

विमलोऽसि ॥४६॥

माया विद्यामलद्वयराहित्याच्चैतन्यमात्रं त्वमसि ॥

'चिदेकरसोऽयमात्मा'।

इति श्रुतेः (नृसिंहो० १।५)। अनेन हेयोपादेयशून्यत्वमापादितम्। इति ॥४६॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

नन्वेतद्विचारणाद्यथोक्तविचारणाद्यथोक्तब्रह्मभावमापन्नस्य जीवन्मुक्तस्य शरीर-निर्वाहाय किं कार्यम् ? इति—आशङ्क्य प्राक्कृतस्य कर्मणो जडभरतादिवत्फलं भोक्तव्यम्—इत्यभिप्रायं सूचयति

क्षमस्व ।।४७।।

यथा प्राप्तशारीरकशीतातपादि, मानसिकमानावमानादि, प्राणिकक्षुत्पिपासा-सादिधर्मान्स्वात्मसमाधानमनसा सहस्व ।।

'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन'[1]

इति श्रुतेः (शरभो० १८) ।।४७।।

कथं तत्सहनं भवेत् ? इत्याशङ्क्याह

स्वपदमास्वादय स्वाहा ।।४८।।

तत्त्वं पदार्थैक्यविरोधिधर्मपरिहारेण तदाधारचैतन्यं ब्रह्माकारया शुद्धसत्तया निश्चय-बुद्धया गृहाण, तद्ग्रहणात्तद्धर्मास्त्वां न बाधेयुरित्यर्थः ।।

एतदाश्रयणेन किमस्ति ? तत्राह—स्वे चैतन्यमात्र आह्वा आवाहनं हवनं लयत्वं तन्मयीभाव इत्यर्थः ।

'ब्रह्मविद्ब्रह्मैव भवति' ।

इति श्रुतेः ।।४८।।

पाठात्पापौघहारिण्या वासुदेवेन धीमता ।

ध्यातुर्भ्रमापहं ब्राह्मीविद्यायाष्टिप्पणं कृतम् ।

---

१ कदाचन—इत्यपि पाठः

।। इति ब्राह्मीविद्यायाष्टिप्पणं समाप्तम् ।।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE